RAMSADAY COLLEGE
DEPARTMENT OF SANSKRIT
SEMESTER-V (HONOURS)
PAPER-CC-12 TOPIC- Kārakaprakaraṇam (Section-C)
Prepared by: Dr. Chaitali Kanjilal

# साधकतमं करणम्

वैयाकरणसिद्धान्तकौमुदीग्रन्थस्य कारकप्रकरणे अस्य पाणिनिसूत्रस्य व्याख्याप्रसङ्गेन भट्टोजीदीक्षितमहोदयेन उक्तं यत्-
'क्रियासिद्धौ प्रकृष्टोपकारकं कारकं करणसंज्ञं स्यात्'।
कर्त्रा क्रियायां जनयितव्यायां यत् सहायभूतं तदुपकारकमित्युच्यते। साधकतममित्यस्य व्याख्यानमेतत्। अतिशयितं साधकं साधकतममिति भावः। यद्व्यापारानन्तरं च फलनिष्पत्तिस्तदेव प्रकृष्टम्।
उक्तञ्च - "क्रियायाः फलनिष्पत्तिर्यद् व्यापारादनन्तरम्।
विवक्ष्यते यदा यत्र करणं तत् तदा स्मृतम्॥" इति

* साधकं कारकं हि पर्यायः। तथा च उभयोपादानेन प्रकर्षः लभ्यते, प्रकृष्टं साधकमिति विज्ञायते। अतः सूत्रे तमब्ग्रहणं व्यर्थमिति आह- तमब्ग्रहणं किमिति। अत्रोच्यते- सत्यं विनापि तमप् प्रत्ययेन करणे इष्टसिद्धिः किन्तु अधिकरणे अनिष्टप्रसङ्गः। आधारोऽधिकरणम् इत्युक्तम्। आध्रियते यस्मिन् स एव आधारः। स च आधारस्त्रिविधः- ऐकदेशिक, औपश्लेषिकः, वैषयिकश्चेति। गौणमुख्ययोः मुख्ये एव कार्यसम्प्रत्ययः इति यो न्यायो विद्यते स एतद्सूत्रादन्यत्र न प्रवर्तते इति ज्ञापनाय इह तमब्ग्रहणम्। अन्यथा आधारोऽधिकरणमिति सूत्रेऽपि प्रयुक्तत्वात् तस्मादेव न्यायात् तिलेषु तैलम्, दध्नि सर्पिरित्यादौ मुख्याधारस्यैव अधिकरणत्वं स्यात्, गङ्गायां घोष इत्यादौ लाक्षणिके ऐकदेशिके च अधिकरणता न जायते। अस्य वारणाय एव तमब्ग्रहणं कृतम्।

---

Scanned with CamScanner